त् सर्वे सर्वनाम्नः स्मै अतः सर्वनाम्नो ङेत्स्य स्मै स्यात् सर्वस्मै ङसिङ्योः स्मा।
त्स्मिनौ अतः सर्वनाम्न एनयोरेतौ स्तः सर्वस्मात् आमि सर्वनाम्नः सुट् अव
र्णांतात्सर्वनाम्नो विहितस्यामः सुडागमः स्यात् एसत्वे सर्वेषां सर्वस्मिन् शे
षं रामवत् एवं विश्वादयोप्यदन्ताः सर्वादयश्च पंचत्रिंशत् सर्व विश्व उभ उभय डतर
डतम अन्य अन्यतर त्वत् त्व नेम सम सिम पूर्व परावर दक्षिणोत्तरापराधराणि
व्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां अंतरं बहिर्योगोपसंव्यानयोः त्य
द् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् इति। उभशब्दो द्वित्वविशि

सि॰ ष्टस्य वाचकः अत एव नित्यं द्विवचनान्तः तस्येह पाठस्तूभकावित्यकजर्थः
अ॰ न च कप्रत्ययेनेष्टसिद्धिः द्विवचनपरत्वाभावेनोभयत उभयत्रेत्यादाविवायचः
प्रसंगात् तदुक्तं उभयोन्यत्रेति द्विवचनपरत्वाभावे उभयशब्दस्य द्विवचनं
नास्तीवचनं नास्तीति कैयटः अस्तीति हरदत्तः तस्मात्तस्य यजादेशस्य स्थानि
वद्भावेन तयप्रत्ययांततया प्रथमचरमेति विकल्पे प्राप्ते विभक्तिनिरपेक्षत्वे॰
नांतरंगत्वान्नित्यैव संज्ञा भवति उभये डतरडतमौ प्रत्ययौ यद्यपि संज्ञावि राम:
धौ प्रत्ययग्रहणे तदंतग्रहणं नास्ति सुप्तिङंतमिति ज्ञापकात् तथापीह॰ 33

तदंतग्रहणं केवलयोः संज्ञायाः प्रयोजनाभावात् अन्यतरान्यतमशब्दावव्यु
त्पन्नौ स्वभावाद्द्विबहुविषये निर्द्धारणे वर्तेते तत्रान्यतमशब्दस्य गणे पाठाभावा
न्न संज्ञा त्वत्वदिति द्वावप्यदंतावन्यपर्यायौ एक उदात्तोऽपरोनुदात्त इत्येके एक
स्त्वान्त इत्यपरे नेम इत्यर्द्धे समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते यथासं
ख्यमनुदेशः समानामिति ज्ञापकात् अंतरं बहिर्योगेति गणसूत्रे अपुरीति व
क्तव्यं अंतरायां पुरि पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसं
ज्ञायां एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र प्राप्तौ

सि· ३४ साज्जसि वा स्यात्। पूर्वे। पूर्वाः स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां
किं दक्षिणा गाथकाः कुशला इत्यर्थः असंज्ञायां किं उत्तराः कुरवः स्वमज्ञा
तिधनाख्यायां ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्
स्वे स्वाः आत्मीया इत्यर्थः आत्मान इति वा ज्ञातिधनवाचिनः स्वाः ज्ञातयोऽर्था
वा अंतरं बहिर्योगोपसंव्यानयोः बाह्ये परिधानीये चार्थे अंतरशब्दस्य प्रा
प्तासंज्ञा जसि वा स्यात् अंतरे अंतरा वा गृहा बाह्या इत्यर्थः अंतरे अंतरा रामः
वा शाटकाः परिधानीया इत्यर्थः पूर्वादिभ्यो नवभ्यो वा एभ्यो ङसिङ्योः स्मा

त्स्मिनौ वा स्तः पूर्वस्मात्। पूर्वात् पूर्वस्मिन्। पूर्वे एवं परादीनां शेषं सर्ववत् ए
कशब्दः संख्यायां नित्यैकवचनान्तः न बहुव्रीहौ बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न
स्यात् त्वकं पिता यस्य त्वत्कपितृकः अहकं पिता यस्य मत्कपितृकः इह समा
सात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते अन्यथा लौकिके विग्रहवा
क्य इव तत्राप्यकच् प्रवर्तेत स च समासेपि श्रूयेत अतिक्रान्तो भवकं तमति
भवकानितिवत् भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं
कृत्वैतत्सूत्रं प्रत्याचा— यथोत्तरं मुनीनां प्रामाण्यम् संज्ञोपसर्जनीभूतास्तु

सि. नसर्वादयः महासंज्ञाकरणेनतदनुगुणानामेवगणेसंनिवेशात् अतःसंज्ञा
३५ कार्यमंतर्गणकार्यंचतेषांनभवति सर्वोनामकश्चित्तस्मैसर्वायदेहि। अति
क्रांतःसर्वमतिसर्वस्तस्मैअतिसर्वाय। अतिकतरंकुलं अतितत् तृतीयास
मासे। अत्रसर्वनामतानस्यात् मासपूर्वाय तृतीयासमासार्थवाक्येपि
नमासेनपूर्वाय द्वंद्वेच द्वंद्वेउक्तासंज्ञान वर्णाश्रमेतराणां समुदायस्यायं
निषेधोनत्ववयवानां नन्वेवंतदंतविधिनासुट्प्रसंगः सर्वनाम्नोविहित
रामः
स्यामःसुडितिव्याख्यानात् विभाषाजसि १।१।३२ जसाधारंयत्कार्यंशीभा

२

ख्यंतत्रकर्त्तव्येद्वंद्वेउक्तासंज्ञावास्यात् वर्णाश्रमेतरे वर्णाश्रमेतराः शीभा
वंप्रत्येवविभाषेत्युक्तमतोनाकच् किंतुकप्रत्ययएव वर्णाश्रमेतरकाः प्रथ
मचरमतयाल्पार्द्धकतिपयनेमाश्च एतेजसःकार्यंप्रत्युक्तसंज्ञावास्युः प्रथ
मेप्रथमाः चरमेचरमाः शेषंरामवत् तयप्रत्ययः तनस्तदंताग्राह्याः द्वित
ये द्वितयाः नेमेनेमाः शेषंसर्ववत् विभाषाप्रकरणे तीयस्यङित्सूपसंख्या
नं द्वितीयस्मै द्वितीयाय एवंतृतीयः अर्थवद्ग्रहणान्नेह पटुजातीयाय
जरायाजरसन्यतरस्यां ७।२।१०१ जराशब्दस्यजरस्वास्यादजादौविभक्तौ

३६ पुष्टांगाधिकारेनस्य च तदंतस्य अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमान-
स्यादेशा भवंति एकदेशविकृतस्यानन्यतयाजरशब्दस्य जरस् निर्जरसौ
निर्जरसः इनाद्यान्बाधित्वापरत्वाज्जरस् निर्जरसा निर्जरेण। निर्जरसे निर्जर
सः पक्षेहलादौ च रामवत् वृत्तिकृतातु पूर्वविप्रतिषेधेनातोः कृतयोः संनिपा
तपरिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरसिन निर्जरसादिति रूपं
नतु निर्जरसा निर्जरस इति केचिदित्युक्तं तथा भिसि निर्जरसैरिति रूपनार
सुकं नस्तु सादिभिस्त्र षष्ठेन कारकेन निर्जरस्येत्येव रूपमिति स्वोक्तं एतच्च

भाष्यविरुद्धं पद्दन्नोमासहृन्निशसन्यूषन्दोषन् ४ यकन्शकन्नुदन्ना
सन्शसप्रभृतिषु पादृदंतनासिकामासहृदयनिशाअसृजयूषदोषयकृ
तशकृतउदकआसनशब्दानां पदादयआदेशाः स्युः शसादौ वा। पतुआसनश
ब्दस्यासन्नादेश इति काशिकायामुक्तं तन्माधविकं पादः पादौ पादाः पादं। पादौ
पदः पादान् पादेन पदा। सुडनपुंसकस्य सुट् प्रत्याहारः स्वादिपंच वचना।
नि सर्वनामस्थानसंज्ञानि स्युः अक्लीवस्य स्वादिषु सर्वनामस्थाने कृत्प्रत्य
पावधिषु स्वादिषु असर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् यचिभं यकआदि

पुंस्त्वजातीयेषु च स्वादिष्व सर्वनामस्थानेषु पूर्वं भसंज्ञा स्यात् आकडारादेका संज्ञा
३७ इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया। या पराऽनवकाशा च
तेन शसादावचि भसंज्ञैव न पदत्वं अनेजस्त्वं च इतः इतो नश्त्वं दृष्ट्वा भ्यासा
भ्यामित्वे पत्वे च यल्लोपः माभ्यां माभिः भस्येत्यधिकृत्य अल्लोपोऽनः अङ्गा
वयवो सर्वनामस्थानयजादिस्वादिपरो यो नः तस्याकारस्य लोपः स्यात् रषा
भ्यां नो णः समानपदे एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्या रामः
त् पथः पथा पूर्वस्मादपि विधौ स्थानिवद्भाव इति पक्षे तु अल्लोपाय इत्येवात्र

णत्वं पूर्वत्रासिद्धमित्येन स्थानिवदिति तु इह नास्ति नस्य दोषः संयोगादिलोपल
णत्वेष्विति निजि ये धातु न लोपः प्रातिपदिकान्तस्य नेनि प्रानि परे के निचलुप्त
षष्ठीकं पदं प्रातिपदिकसंज्ञकं यत्पदं तदन्तं नस्य नकारस्य लोपः स्यात् नलोपस्या
सिद्धत्वाद्दीर्घमेत्वमैसत्त्वं च न ऋभुभ्यां ऋभुभिः ऋभुभ्यः इत्यादि विभाषा ङिश्यो
अङ्गावयवोऽसर्वनामस्थानपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्यो
परयोः ऋक्षि ऋक्षणि पक्षे रामवत् पञ्चन् इति स्वत्रेमभ निग्रहणं मकारार्थं
तथा च कौमुद्याः स्यामपि दोषस्त्रादेशो भाष्यकृता उदाहृतः तेन परं

३८ ग्रिवरस्रोः स्त्रियांसकलं तद्वन्मानसंमनइत्यादिसंगछते आसन्यंप्राणमूचुरिति
च आस्येभवः आसन्यः दोषशब्दस्यनपुंसकत्वमप्यतएवभाष्यात् तेनद
क्षिणंदोर्निशाचरस्येतिसंगछते भुजबाहूप्रवेष्टोदोरितिसाहचर्यात्पुंस्त्व
मपि दोषंतस्यतथाविधस्यभजतइति द्वयोरह्नोर्भवोद्व्यहः संख्याविसा
यपूर्वस्याह्नस्याहन्नन्यतरस्यांङौ संख्यादिपूर्वस्याह्नस्याहन्नादेशोवास्यान्ङौ
द्व्यह्नि। द्व्यह्नि द्व्यहनि द्व्यह्ने विगतमहः व्यहः व्यह्नि व्यहनि व्यह्ने अहः सायः
सायाह्नः सायाह्नि सायाहनि सायाह्ने इतिदंताः विश्वपाः दीर्घाज्जसिच दीर्घात् रामः

ज्जसिइतिचपरेप्रथमयोः पूर्वसवर्णदीर्घोनस्यात्। वृद्धिः विश्वपौसवर्णदी
र्घः विश्वपाः यद्यपीहऔङिनादिचीत्येवसिद्धंजसितुसत्यपिपूर्वसवर्णदी
र्घेक्षतिर्नास्ति तथापिगौर्यौगौर्यः इत्याद्यर्थंसूत्रमिहापिन्याय्यत्वादुप
न्यस्तं आतोधातो आकारान्तोयोधातुस्तदन्तस्यभस्यांगस्यलोपःस्यात्
अलोन्त्यस्य। विश्वपः विश्वपा। विश्वपाभ्यां विश्वपाभिः एवंशंखध्मादयः
धातोःकिं हाहान् हासवर्णदीर्घः हाहाङे वृद्धिः हाहैङसिङसोःदीर्घः हाहाः
ओसिवृद्धिः हाहौः ङौ आद्गुणः हाहे शेषंविश्वपावत् आतइतियोगविभा

सि॰
३५

गाद्धातोरप्यात्लोपः क्वचित् स्कः श्रः स्मादेनाः हरिः प्रथम ह्रस्वगुणः योः पू
र्वसवर्णः हरी जसि च ह्रस्वांतस्यांगस्य गुणः स्यात् जसि परे हरयः ह्रस्वस्य गुण
स्यात् संबुद्धौ एङ्ह्रस्वात्संबुद्धेः लोपः हे हरे हरिं हरी हरीन् शेषो घ्यसखि
अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् शेषः किं म
स्यै एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थं ह्रस्वौ किं वातप्रम्ये यूः किं मा
त्रे आङोना स्त्रियां घेः परस्याङो नास्यात् स्त्रियां आङिति टा संज्ञा प्रा
चां हरिणा अस्त्रियां किं मत्या घेर्ङिति घिसंज्ञस्य ङिति सुपि गुणः स्यात्

हरये घेः किं सख्ये ङिति किं हरिभ्यां सुपि किं पद्वी घेर्ङिनीति गुणे कृते ङसिङसो
श्च एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् हरेः हर्योः हरीणां अच्च घेः
इदुद्भ्यामुत्तरस्य ङेरौत् घेरन्तादेशश्चाकारः हरौ हर्योः हरिषु एवं श्रीपत्यग्निर
विकव्यादयः अनङ् सौ सख्युरंगस्यानङ् स्यादसंबुद्धौ परे ङिच्चेत्यंतादेशः अलो
न्त्यात्पूर्व उपधा अंत्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् सर्वनामस्थाने चासंबु
द्धौ नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे अपृक्त एकाल् प्रत्य
यः एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् हः

ऽनात्परं दी॰ घी यो ङ्याप्यौ न दंतात्परं सुतिसी त्येतदपृक्तं हल्लुप्यते हल्ङ्याब्भ्यो।
किं ग्रामणीः दीर्घात्किं निष्कौशाम्बिः अतिखट्वः सुतिसीति किं अभैत्सीत्
तिपासह चरितस्य ग्रहणात् सिबोग्रहणंनास्ति अपृक्तं किं बिभर्ति हल्किं
।—भेद् प्रथमहल्किं राजा नलोपो न स्यात्संयोगांतलोपस्यासिद्धत्वात् सखा
हे सखे सख्युरसंबुद्धौ सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्
अचो ञ्णिति ञ्णिति च परे अजंतांगस्य वृद्धिः स्यात् सखायौ सखायः स-
खायं सखायौ सखीन् घिसंज्ञाभावान्न तत्कार्यं सख्या सख्ये ख्यत्यात्परस्य खि

राम: ४०

तिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः स्यात्।
सख्युः औत् इदुद्भ्यां परस्य ङेरौत्स्यात् उकारानुवृत्तिरुत्तरार्था खितिशब्दाभ्यां खी
तीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः स्यात् सख्युः औत् इदुद्भ्यां
परस्य ङेरौ शेषं हरिवत् एभनः सख्या सुसखा। सुसखायौ सुसखायः अनङ्णि
द्वद्भावयो रंगत्वात् तदंते प्रवृत्तिः समुदायस्य सखिरूपत्वाभावेनासखीति निषेधा
प्रवृत्ते घिसंज्ञा सुसखिना सुसखये। ङसिङसोर्गुणे कृतयणादेशत्वाभावात् ख्यत्या
दित्युत्त्वं न सुसखेः सुसखौ इत्यादि एवमतिसखिः सखीनतिसखा। परमसखायु

स्येतिविग्रहे परमसखा परमसखायावित्यादि गौणत्वेप्यनङ्णित्वे प्रवर्तेते
४१ सखीमतिक्रान्तोऽतिसखिः लिंगविशिष्टपरिभाषाया अनित्यत्वान्न टच् ह
रिवत् ह्रस्वानङ्णित्वे न भवतः गोस्त्रियोरिति ह्रस्वत्वेन सखिशब्दस्य लाक्षणिक
त्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् पतिः समास एव
घिसंज्ञः स्यात् पत्या पत्ये पत्युः पत्यौ शेषं हरिवत् समासे तु भूपतये क
तिशब्दो नित्यं बहुवचनान्तः बहुगणवतुडति संख्या एते संख्यासंज्ञाः स्युः डति राम
च डत्यन्ता संख्या षट्संज्ञा स्यात् प्रत्ययस्य लुक्श्लुलुपः लुक्श्लुलुप्शब्दैः ४१

कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् षड्भ्यो लुक् षड्भ्यः परयोर्जश्शसोर्लु
क् स्यात् प्रत्ययलोपे प्रत्ययलक्षणं प्रत्यये लुप्तेपि तदाश्रितं कार्यं स्यात् इ
ति जसि चेति गुणे प्राप्ते न लुमताङ्गस्य लुक्श्लुलुप एते लुमन्तः लुमता श
ब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् कति कति कतिभिः कतिभ्यः कतीनां कतिषु
अस्मद्युष्मद्षट्संज्ञकास्त्रिषु सरूपाः त्रिशब्दो बहुवचनान्तः त्रयः त्रीन् त्रिभिः
त्रिभ्यः त्रिभ्यः त्रेस्त्रयः त्रिशब्दस्य त्रयादेशः स्यादामि त्रयाणां परमत्रयाणां गौ
णत्वे तु नेति केचित् प्रियत्रीणां वस्तुतस्तु । प्रियत्रयाणां त्रिषु द्विशब्दो द्विव

४२ चनांत त्यदादीनामः एषामकारोन्तादेशः स्याद्विभक्तौ द्विपर्यन्तानामेवेष्टः

द्वौ २ द्वाभ्यां३ द्वयोः २ द्विपर्यंतानां किं भवान् भवंतौ भवंतः संज्ञायामुपसर्जन

त्वेचनात्वं सर्वाद्यंतर्गणकार्यत्वात् द्विर्नामकश्चिन् द्विः द्वौ द्वयः द्वावतिक्रांतो

ऽतिद्विः हरिवत् प्राधान्येनुपरद्वौ इत्यादि औडुलोमिः औडुलोमी उडुलो

माः लोम्नोऽपत्येषु बहुष्वकारोवक्तव्यः बाह्वादीञोपवादः औडुलोमी। उडु

लोमान् एनी दनाः वातप्रमीरित्सुणादिसूत्रेणमाङ ईप्रत्ययः कित् वातप्रमिमी

तेवातप्रमीः दीर्घाज्जसिच। वातप्रम्यौ। वातप्रम्यः हेवातप्रमीः अमिपूर्वः वा ४२

तप्रमीं। वातप्रम्यौ वातप्रमीन् वातप्रम्या। वातप्रम्ये वातप्रम्यः वातप्रम्यो

वातप्रम्यां दीर्घान्नटुट्। ङौनुसवर्णेदीर्घः वातप्रमी। वातप्रमाञ्जु। एवंय

यीपप्यादयः यांत्यनेनेतियर्यीर्मार्गः पातिलोकमितिपपीः सूर्यः यायोः

कि— हेचेतिईप्रत्ययः क्विंवनवातप्रमीशब्दस्यतु अमिशासिङौचविशेषः

वातप्रम्यं वातप्रम्यः वातप्रम्यि एरनेकाचइतिवक्ष्यमाणेणयण् प्रधाव

न् बह्वः श्रेयस्योयस्यसवहुश्रेयसी। दीर्घज्यूनत्वाद्धल्ङ्याद्भिलोपः पूस्मा

द्योनदी। ईदूदंतौनित्यस्त्रीलिंगोनदीसंज्ञौस्तः प्रथमलिंगग्रहणंच पूर्वे

स्मास्व्यस्योपसर्जनत्वेपिनदीत्वंवक्तव्यमित्यर्थः अंवार्थनद्योर्ह्रस्वः अंवार्था
४३ नांनद्यंतानांचह्रस्वःस्यात्संबुद्धौ हेवहुश्रेयसि आसि वहुश्रेयसीन् आण्न
द्याः नद्यंतात्परेषांङितांनामाडागमःस्यात् आटश्च आटोचिपरेवृद्धिरेकादेशः
स्यात् वहुश्रेयस्याः २ नद्यंतात्परत्वान्नुट् वहुश्रेयसीनां ङेराम्नद्याम्नीभ्यः
नद्यंतादावंतान्नीशब्दाच्चङेःआमस्यात् इहपरत्वादाटानुड्बाध्यते वहुश्रेय
स्यां शेषमीप्रत्ययांतत्वात्प्रमीवत् अङ्यंतत्वाच्चसुलोपः अतिलक्ष्माःशे
षंवहुश्रेयसीवत् कुमारीमिच्छन्कुमारीवाचरन्वाब्राह्मणः कुमारी क्यजं ४३

तात्क्विपरक्विवंताद्वाकर्तरिक्विप् हल्ङ्याब्भ्योदीर्घात्लोपः आचिश्नुधातुभ्रुवांय्वोरि
यङुवङौ श्नप्रत्ययांतस्यइवर्णांतधातोर्भ्रूइत्येतस्यांगस्यइयङुवङौस्तोजा
तौप्रत्ययेपरे इउवोःसंनादेशा अंतरतम्यादियङ् उवङ् इतिद्वयदि
शोभवेत् एरनेकाचोसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वोनभवतियइवर्ण
स्तदंतोयोधातुस्तदंतस्यानेकाचोंगस्ययणस्यादजादौप्रत्ययेपरे इतियर
सः कुमार्यौकुमार्यः हेकुमारि अमिशसिच कुमार्यं कुमार्यः इतिविशेषः
४४ कुमार्यैकुमार्याःकुमार्योः कुमारीणां कुमार्यां प्रधीः प्रध्यं प्रध्यः उन्नयतीतिउ

४५ न्नीः धातुना संयोगस्य विशेषणत्वादिह स्यादेव यण् उन्न्यौ उन्न्यः उन्न्यं ङेराम्
उन्न्यां एवं ग्रामणीः अनेकाचः किं नीः नियौ नियः अमि शसि च परत्वादियङ्
नियं ङेराम् नियां असंयोगपूर्वस्य किं सुश्रियौ यवक्रियौ गतिकारकेतरपू
र्वपदस्य यण्नेष्यते शुद्धधियौ परमधियौ कथं तर्हि दुर्धियः वृश्चिकभियेत्यादि
उच्यते दुःस्थिता धीर्येषामिति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति
यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः वृश्चिकसंज्ञस्य तु बुद्धि रामः
हननमपादानत्वं नेह विवक्षितं वृश्चिकसंबंधिनी भीः वृश्चिकभीरित्युत्तरपदलो ४५

पो वा न भूसुधियोः एतयोर्यण् न स्यात् अचि सुपि सुधियौ सुधियः सखायमि
च्छतीति सखीयति ततः क्विप् अल्लोपयलोपौ अल्लोपस्य स्थानिवत्त्वाद्यणि प्राप्ते
क्वौ लुप्तं न स्थानिवत् एकदेशविकृतस्यानन्यत्वादनङ् इत्येवं सखा सखायौ
सखायः हे सखीः अमि पूर्वरूपात्परत्वाद्यणि प्राप्ते ततोऽपि परत्वात्सख्युरसं
बुद्धाविति णित्वप्रवर्तनेन सखायं सखायौ शसि यण् सख्यः सह खेन वर्तते इति स
खः तमिच्छतीति सखीः सुखमिच्छतीति सुखीः सुतमिच्छतीति सुतीः सख्यौ सुख्यौ
सुत्यौ न ख्यत्यादिति दीर्घस्यापि ग्रहणादुकारः सख्युः सुख्युः सुत्युः लूनमिच्छतीति

लूनीः त्रामं त्रामीः अस्तामं मस्तीमीः एषांङ ॥ सिद्ध ॥ सोयं णत्वमत्वयोरसिद्ध
४५ त्वात् स्वमत्यादिति सुत्वं न स्वः क्षाम्युः अस्तोम्युः स्पुष्का यते। सुष्कीः एर्कीः इयङ् सु
ष्क्रियो सुष्क्रियः उ ॥ सिद्ध ॥ सोः सुष्क्रियः ईर्द् नाः ग्रामुर्हे रिव [illegible] सर्व्व विस्तुवास्तु
मान्वाक्ष्यः तृज्वत्क्रोष्टुः तृजंने तुल्यं वर्त्तने ऽसंबु [illegible] द्धौ सर्व्वनामस्थाने प
रे क्रोष्टु शब्दस्याने क्रोष्टृ आदेशः प्रयोक्तव्य इत्यर्थः [illegible] सर्व्वनामस्था
नयोः ऽद्वौ सर्व्वनामस्थाने च परे ऽन दं नाग स्य गुणः स्यादिति प्राप्ते [illegible] शन ४
सुस्त दंसोनेहसांच ऋदन्तानामुशनसादीनां चानङ् स्यात् असंबुद्धौ सौ परे

असन्तत् चूस्वसननप्तृ नेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणां अबादीनामुप
धाया दीर्घः स्यादसंबुद्धौ सर्व्वनामस्थाने परे नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नि
यमार्थं तेन पितृभ्रातृप्रभृतीनां न उद्गातृशब्दस्य भवत्येव समर्थसूत्र उ
द्गातार इति भाष्यप्रयोगात् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रो
ष्टून् विभाषा तृतीयादिष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् क्रोष्ट्रा
क्रोष्ट्रे अनतऊन् ऋदन्तात् ङ ॥ सिद्ध ॥ सोः ऋतिपरे उकार णकारे शः स्यात् रपरत्वं
रान्तस्य रेफान्तसंयोगान्तस्य सस्यैव लोपो नान्यस्य रेफस्य विसर्गः क्रोष्टुः रम्रा

आमिपरत्वात्तृज्वद्भावेप्राप्ते नुमचिरतृज्वद्भावेभ्योनुटपूर्वविप्रतिषेधेन
क्रोष्टूनां क्रोष्टॄनां क्रोष्टरि क्रोष्टोःपक्षेहलादौशंभुवत् इत्युदंता हूहूःहूहौ हू
५६ हः हूहूं हूहौ हूहून् अतिचमूशब्दस्यतुनदीकार्यंविशेषः हे अतिचमु अति
चम्वै अतिचम्वाः अतिचमूनां खलपूः ओःसुपिधात्ववयवसंयोगपूर्वो
नभवतियउवर्णस्तदंतोयोधातुस्तदंतस्यानेकाचोंगस्ययण्स्यादजादौसु
पिगतिकारकेतरपूर्वस्यतेष्यते खलप्वौःखलप्वः एवंसुल्वादयः अनेका रामः
चःकिंलूःलुवःधात्ववयवेत्यादितिकिं उल्लूः उल्लौ असंयोगपूर्वस्यकिं क ५६

ट ग्मकालम्भशब्दोस्वयंभूवत् इत्युदंताःधाता हे धातः धातारौ धातारं ऋवर्णान्नस्यणत्वंवाच्यं धातॄणां ७
टप्रुवःगतीत्यादिकिं परमलुवौसुपिकिं लुलुवतुःस्वभूः नभूसुधियोःस्वभु
वौ स्वभुवःवर्षाभ्वश्च। अस्योवर्णस्ययण्स्यादजादौसुपि वर्षाभ्वौ वर्षाभ्वः दृन्भ
तीतिदृन्भूः अंहूर्जम्बूककफेलूकर्कंधूर्दिधिषूरित्युदंताहृस्वत्रेणत्वमित्याद्यर्थः
भ्वौ दृन्भ्वःदृन्भ्वं दृन्भ्वौदृन्भून् दृन्भितिनानेहिंसार्थेअव्ययेभुवःक्विप् दृन्भूः दृन्भ
रपुनः पूर्वस्यभुवोयण्वक्तव्यः दृन्भ्वं दृन्भ्व खलपूर्ववत् करभ्वः करभ्वौ क
रभ्वःदीर्घपाठेकरणवकारः स्वार्थिकप्रत्ययाद्यण् कारभ्वौ कारभ्वःपुनर्भूर्यौ
गिकःपुंसिपुनर्भ्वांवित्यादि एवंनप्त्रादयःउद्गातारो पिताभ्रातुःमनिपततेपितृस्त्रा

४१ द्विग्रहणस्य नियमार्थत्वान्न दीर्घः पितरौ पितरः पितरं पितरौ शेषं धातृवत् ए
वं जामातृभ्रात्रादयः ना। नरौ। नरः हे नः नृ च नृ इत्यस्य नामि वा दीर्घः स्यात्
नृणां नृणां इत्यृदन्ताः कृ ऌ अनयोरनुकरणं प्रकृतिवदनुकरणमिति वै
कल्पिकातिदेशादित्वे रपरत्वं कीः किरौ किरः तीः तिरौ तिरः इत्यादि गौणत्वेन इ
त्वाभावपक्षे ऋदुशनेति सूत्रेणाऽङि। इति च तपरकरणादनङ् गुणेन क्रः क्रौ क्रः
क्रं क्रौ क्नृन् क्रा क्रे इत्यादि इति ऋदन्ताः गम्लृ शक्लृ अनयोरनुकरणे अनङ् रामः
मागमा श्रा— गुणविषये लृत्वं गमलौ गमलः गमलं गमलौ गम्लृन् गम्ला ४१

गम्ले। ङसिङसोरुक्तस्तत्र उदित्सु त्वे लपरत्वे च संयोगान्तलोपः गम्लुः शकु
लृ इत्यादि इति लृदन्ताः सेः सयौ सयः स्मृतयौ स्मृतयः इत्येदन्ताः गोतो णित्
गोशब्दात्परं सर्वनामस्थानं णिद्वत्कार्यकृत्स्यात् गौः गावौ गावः औतोऽम्शसो
आम्ओतः इति छेदः ओकारादमशसोरचि परे आकार एकादेशः स्यात् शसासा
ह्चयोत्सुवेवामग्रत्वे नेह अचित्वं गां गावौ गाः गवा गवे गोः इत्यादि ओ
तो णिदिति वाच्यं विहितविशेषणं च तेन सुद्योः सुद्यावौ सुद्यावः ओकारान्ता
द्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह हे भानो भानवः उं शंभुः स्मृतोपेनस

स्मृतौः स्मृत्यावौ स्मृतावः स्मृतां स्मृतावौ स्मृताः इत्यादन्ताः रायो हलि रैत्रा
४८ व्दस्य आकारोन्तादेशः स्यात् हलि विभक्तौ ः अचि आयादेशः रा रायौ रायः रायं
रायौ रायः राया राभ्यां इत्यैदन्ता ग्लौः ग्लावौ ग्लावः ग्लावं ग्लावौ ग्लावः औतो
ऽम्शसोरिति नीहनप्रवर्तते ऐ औ च सूत्रे एओ औहैतौः सावर्ण्याभावनापनात्
इत्यजन्ताः पुल्लिंगाः रमा औङ आपः ७।१।१८ आवंतादंगात्परस्यौङः शीस्या
त् औङित्योकारविभक्तेः संज्ञा रमे रमाः संबुद्धौ च आप एकारस्यात्संबुद्धौ ए रामः
ङ् ह्रस्वादिति संबुद्धिलोपः हे रमे २ हे रमाः रमां रमे स्त्रीत्वान्नत्वाभावः रमाः आङि ४९

चापः आङि ओसि च परे आवंतस्यांगस्य एकारः स्यात् रमया रमाभ्यां रमा
भिः याडापः आपः परस्य ङिन्वचनस्य याडागमः स्यात् वृद्धिरेचि रमायै सवर्ण
दीर्घः रमायाः २ रमयो रमाणां रमायां रमयोः रमासु एवं दुर्गादयः सर्वनाम्नः
स्याड्ढ्रस्वश्च आवंतात्सर्वनाम्नः परस्य ङितः स्याडापश्च ह्रस्वः याटोपवादः सर्व
स्यै सर्वस्याः २ एकादेशस्य पूर्वांतत्वेन ग्रहणादामि सर्वनाम्न इति सुट् सर्वा
सां सर्वस्यां सर्वयोः सर्वासु एवं विश्वादयः आवंताः विभाषा दिक्समासे बहुव्री
हौ अत्र सर्वनामता वा स्यात् उत्तरपूर्वस्यै उत्तरपूर्वायै दिङ्नामान्यंतराले इति प्र

४८ तियदोक्तस्य द्विवत्तमासस्य ग्रहणान्नेह योनरा सा पूर्वीयस्माउन्मुग्धायास्त
स्मैउत्तरपूर्वायै वहुव्रीहिग्रहणंस्पष्टार्थं अन्तरस्यैशालायै वाह्यायैइत्यर्थः
अपुरीत्युक्ते नेह अन्तरायैनगर्यै विभाषाद्वितीयाभ्यां आभ्यां ङितः स्याडापश्च
ह्रस्वः इदं त्यक्तुं शक्यं तीयस्यङित्सूपसंख्यानात् द्वितीयस्यै द्वितीयायै द्विती
यस्याः द्वितीयायाः द्वितीयस्यां द्वितीयायां शेषं रमावत् एवं तृतीया अंवा
र्थनद्योर्ह्रस्वः हे अंव हे अल्ल हे अक्क असंयुक्ता येडलकास्तद्वतां न ह्रस्व इह अं राम
वाजै हे अंव - हे अंविके जर ए जरसे शीभावात्परत्वाज्जरसु आमि नुटः परत्वा ४८

ज्जरस्त् जरसामित्यादि पक्षेरमावत् इह सर्वप्रतिषेधेन शीभावं सन्निपातपरि
भाषायाअनित्यत्वं संश्रित्य जराभ्यसी इति केचित् तन्निर्मूलं यद्यपि जरसा
स्म देशं अनाश्रित्य निवद्धा वेनाव्वं न तामाश्रित्य ओङ आपः अङिचापः
पः ह्रस्वनद्योपः दुरामरतिपंचधयः आ एवं नस दतुनयाप्यनलिधा विस्तु नित्र
तेन भवति आम्नाविविमस्लिव्यकाररूपस्येवायः सर्वत्र ग्रहणात् एवं हल
ड्याब्दि सूत्रेपि आ आपइं यं इ इति प्रश्लेषात् निवद्धः निष्कोशांविरित्यादिसि
द्वेः दीर्घग्रहणं प्रत्ययस्थेयं नचैरमप्पातिरव ड्व्यैत्यत्रस्वाश्रयमाकारत्वं स्या

निकृष्टत्वेनापूर्वत्वं चाश्रितस्य याहूस्वादितिवाच्यं आवं तं यदंगं तन्न परस्य यादि

५० धानात् उपसर्जनस्त्रीप्रत्ययेन तदादिनियमात् नपद्दन्नस्द्रनिनासिकायान्

स् नसः नासिकया नसा नोभ्यामित्यादि पक्षे सुटि रमावत् निशया निश

निशा निशः निशम् व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८।२।३६ व्र

श्चादीनां सप्तानां छशांतयोश्च षकारो ऽन्तादेशः स्यात् झलि पदांते च षस्य ज

त्वेन डुः निड्भ्यां निड्भिः सुपि ड्ःसीति पक्षे धुट् चर्त्वं तस्यासिद्धत्वाच्चयो द्वितीया रा॰म॰

इति टतयोः ष्टयोन नपदांताट्टोरिति ष्टुत्वं न निट्सु षट्सु षट्त्सु षढोः कः सि षस्य ५०

च कः स्यात् सकारे परे ष्टुत्वं तु न भवति असत्वमस्यासिद्धत्वात् केचित्तु व्रश्चा

दिसूत्रे दादेर्धातोरिति सत्वाद्धातोरित्यनुवर्तयन्ति तन्मते असत्वेन जकारे नि

ड्भ्यां निड्भिः श्चुत्वं निचस्तु चोः कुरिति कुत्वं तु न भवति असत्वस्यासिद्धत्वा

त् मांसस्य ननासान्तो नांमास् पृतन्नवोवाच्याः शसादेष्वा एनः पृद्भ्यां इत्यादि प

क्षे सुटि चरमावत् गोपाविश्वपावत् मतिः प्रायेण हरिवत् स्त्रीत्वान्नत्वाभावः

मतीः नात्वं न मत्या ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्य

स्त्रीलिंगावीदूतौ ह्रस्वौ चवरुवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे आण्नद्याः म

५१ तै। मतये मत्याः मतेः नदीत्वपक्षे औदिति ङेरौत्वे प्राप्ते इदुद्भ्यां नदीसंज्ञकाभ्या
मिदुद्भ्यां परस्य ङेराम्स्यात्‌ पक्षेऽच्च घेः मत्यां मतौ एवं श्रुतिस्मृत्यादयः त्रि
चतुरोः स्त्रियां तिसृचतसृ ७।२।९९ योरेनयोरेनावादेशौ स्तो विभक्तौ परतः अ
चि र ऋतः ।७।२।१०० तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि गुणदी
र्घोत्वानामपवादः तिस्रः २ तिसृभिः तिसृभ्यः तिसृभ्यः आमि नुमचिरेति नुट न
तिसृचतसृ ६।४।४ नृ योर्नामि दीर्घो न स्यात्‌ तिसृणां तिसृषु स्त्रियामिति त्रिच राम:
तुरोर्विशेषणान्नेह प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः मतिवत्‌ आमि प्रि ५१

यत्रयाणामिति विशेषः प्रियास्तिस्रो यस्य सः इति विग्रहे तु प्रियतिसा प्रियति
स्रौ प्रियतिस्रः प्रियतिस्रमित्यादि प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि स्तमो
र्लुका लुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः न लुमतेति निषेधस्यानि
त्यत्वात्‌ पक्षे प्रियतिसृ रादेशात्पूर्वं विप्रतिषेधेन नुम्‌ प्रियतिसृणी प्रियति
सृणि तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्‌ पर्यायेणानुमभावे प्रिय
तिस्रा प्रियतिसृणा द्वेर द्वित्वे सत्याप्‌ द्वेर द्वाभ्यां ३ द्वयोः २ गौरी गौर्यौ गौर्यः नदी
कार्यं ङे गौरि गौर्यै एवं वाणी नद्यादयः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि

सि. ग्रहणादनङ्। गौरिद्भावे च प्राप्ते विभक्तौ लिंगविशिष्टाग्रहणं सखी सख्यौ स
५१ ख्यः इत्यादि गौरीवत् अङ्अंतत्वान्न सुलोपः लक्ष्मीः शेषं गौरीवत् एवं तरी
तंत्र्यादयः स्त्री हे स्त्रि स्त्रियाः स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियो वा
मूशसोः ६।४।८० अमि शसि च स्त्रिया इयङ् वा स्यात् स्त्रीं स्त्रियं स्त्रियः स्त्रीः स्त्रि
या स्त्रियै स्त्रियाः २ स्त्रियोः परत्वान्नुट् स्त्रीणां स्त्रियां स्त्रियोः स्त्रीषु स्त्रियमति
क्रांतो ऽतिस्त्रिः अतिस्त्रियौ गुणनाभावो ऽत्र नुडिः परत्वात्पुंसि बाध्यते ङौ चेत्नुमा
चस्त्रीशब्दस्त्रियां स्त्रियोः स्त्रीषु स्त्रियमतिक्रांतो ऽतिस्त्रिः अतिस्त्रियौ गुणना ५२

सेवौत्यङि। त्यवधार्यतां जसि चात् अतिस्त्रयः हे अतिस्त्रे। अतिस्त्रियौ अतिस्त्रि
यः वामशसोः अतिस्त्रिं अतिस्त्रियं अतिस्त्रियः अतिस्त्रीन् अतिस्त्रिणा घे
ङिति अतिस्त्रयेऽ अतिस्त्रेः अतिस्त्रियोः अतिस्त्रीणां अतिस्त्रौ ओस्यौका
रे च नित्यं स्यादमशसोस्तु विभाषया इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्ज
ने क्लीवे तु नुम् अतिस्त्रिंणी। अतिस्त्रिणे ङे प्रभृता वजादौ वक्ष्यमाणपुंव
द्भावात् पक्षे प्राग्वद्रूपं अतिस्त्रये अतिस्त्रिणः अतिस्त्रेः २ अतिस्त्रिणोः
अतिस्त्रियो रित्यादि स्त्रियां तु प्रायेण पुंवत् शसि। अतिस्त्रीः अतिस्त्रियाङि।

तिह्रस्वश्चेतिह्रस्वांतत्वमप्युक्तो विकल्पः अस्त्रीति तु इयङुवङ्स्थानावित्यस्यै
५३ वपर्युदासस्तत्संबंधस्यैवानुवृत्तेः दीर्घस्यायं निषेधो न तु ह्रस्वस्य अतिस्त्रियै
अतिस्त्रये। अतिस्त्रियाः अतिस्त्रेः अतिस्त्रियां अतिस्त्रौ। श्रीः श्रियौ श्रियः नेय
ङुवङ्स्थानावस्त्री १।४।४ इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न
तु स्त्री। हे श्रीः श्रियै श्रिये श्रियाः श्रियः वामि इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि
वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां श्रियां श्रियि श्रियां प्रधीशब्दस्य तु वृत्तिका
रादीनां मते लक्ष्मीवद्रूपं पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति राम: ५३

स्वीकारात् लिंगान्तरानभिधायकत्वं नदीत्विके परमते तु पुंवद्रूपं प्रकृष्टा धीरि
ति विग्रहे तु लक्ष्मीवत् अभिधानिश्च प्रध्यं प्रध्यः इति विशेषः सुष्ठु धीर्यस्याः सु
ष्ठु ध्यायति वेति विग्रहे वृत्तिमते सुधीः श्रीवत् मतान्तरे पुंवत् सुष्ठु धीरिति वि
ग्रहे तु श्रीवदेव ग्रामणीः पुंवत् ग्रामं नयनस्योत्सर्गतः पुंधर्मत्वात् पदान्तरं वि
ना स्त्रियामप्रवृत्तेः एवं खलप्रवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यं धेनुर्मति
वत् स्त्रियां च स्त्री वा विक्रोष्टुशब्दस्तृजंतवद्रूपं लभ्यते अत्रेभ्योऽङ् १।४।१
ऋकारदंतेभ्यो नकारांतेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः वधूर्गौरीव

त् ॥ ञः आवत् ॥ हे सुभ्रूः कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः प्रमाद एवायमि
५४ ति वहवः खलप्वः पवन्त पुनर्भूः दृन्करेति यण् उवङो वाधनार्थं पट्ड्वङि इति निये
धोन हे पुनर्भु पुनर्भ्वः एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन्समासे पू
र्वपदस्थान्निमित्तात् परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं ।
स्यात् आरंभसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थं यणं वाधित्वाप
रत्वान्नुट् पुनर्भूणां वर्षाभूः भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयट रामः
मते मतांतरे तु हे वर्षाभु पुनर्नवायां तु हे वर्षाभु भेकां पुनर्नवायां स्त्री वर्षाभ्व ५५

दृन्भूः पुमानिति पाठः वर्षाभ्वश्च वर्षाभ्वौ वर्षाभ्वः स्वयंभूः पुंवत् न षट्स
स्वस्रादिभ्यः ४।१।१० षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः स्वसा तिस्रश्च
तस्रश्च ननांदा दुहिता तथा याता मातेति सप्तैते स्वस्रादय उदाहृताः अस्त्रि
ति दीर्घः स्वसा स्वसारौ स्वसारः माता पितृवत् शसि मातॄः द्यौर्गोवत् राः पुंवत्
नौर्ग्लौवत् इत्यजंताः स्त्रीलिंगाः अतोम् ७।१।२४ अतोङ्गात्क्लीवात्स्वमोरम्
स्यात् अमि पूर्वः ज्ञानं एङ्ह्रस्वादिति हल्मात्रलोपः हे ज्ञान नपुंसकाच्च क्लो
वादौङः शी स्यात् भसंज्ञायां यस्येति च भस्येवर्णावर्णयोर्लोपः स्यात् इका

रेतद्धिते च परे ह्रस्वकारलोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ज्ञाने जश्शसोः
५५ शिः क्लीवादनयोः शिः स्यात् शिसर्वनामस्थान शिइत्येन तु कसंज्ञं स्यात् नपुंस
कस्य झलचः ७।१।७२ झलंतस्याजंतस्य च क्लीवस्य नुमागमः स्यात्सर्वना
मस्थाने परे उपधायादीर्घः ज्ञानानि पुनस्तद्वत् शेषं रामवत् एवं धनवना
दयः अद्ड्डतरादिभ्यः ७।१।२५ एभ्यः क्लीवेभ्यः स्वमोरद्डादेशः स्यात् टेः ६।४।
१४३ इति परभस्य टेर्लोपः स्यात्। वाव पंचभ्यः साने। कतरत् कतरद्। कतरे। कत
राणि भस्येति किं पंचमः टेर्लुप्तत्वात्प्रथमयोरिति पूर्वसवर्णदीर्घः एतद्रूपवारि रामः ५५

त्तिसंवुद्धिलोपश्च न भवति हेकतरत् पुनस्तद्वत् शेषं पुंवत् एकतमत् इत
मत् इतरत् अन्यत् अन्यतरत् अन्यतमस्य तु अन्यतमस्य तु अन्यतममि
त्येव एकतरात्प्रतिषेधो वक्तव्यः एकतरं। सो रमादेशे कृते संनिपात परिभा
षया न जरस् अजरं अजरसी अजरे परत्वाज्जरसि कृते झलंतत्वान्नुम् सांत
महतः संयोगस्य सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यात्
असंबुद्धौ सर्वनामस्थाने परे अजरांसि अमि लुकोपवादमप्यभावं वाधित्वा
परत्वाज्जरस् ततः सन्निपातपरिभाषया नलुक् अजरसं अजरसी अजरे अ
८

५६ उरांसि अक्षराणि शेषं पुंवत्। पद्दन्निति हृदयोदकास्यानां हृद् उदन् आसन् हृंदि
हृदा हृद्भ्यामित्यादि उदानि उद्ना उद्भ्यामित्यादि आसानि आस्ना आसभ्यामित्यादि
मांसि मांसा मांभ्यामित्यादि वस्त्रतस्त्रप्रभृतिग्रहणं प्रकारार्थमित्युक्तं अत
एव भाष्ये मांस्पचन्या उखाया इत्युदाहृतं अयस्मयादित्वेन भत्वात्संयोगांत
लोपेन यदन्तदन्त्यत्रछंदसीत्यनुवर्त्तितं वृत्तौ तथापि अयोभीत्यत्र मासश्श
छंदसीति वार्तिके छंदोग्रहणस्य मर्य्यादोक्तेः पिकविदिति केयटोक्तरीत्या रम्मः
प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यं ह्रस्वो नपुंसके प्रातिपदिकस्य ५६

१।२।४७ क्लीबे प्रातिपदिकस्याजंतस्य ह्रस्वः स्यात्। श्रीपाय। अत्र संनिपातपरिभाष
या। आतो धातोरिति लोपो न स्वमोर्नपुंसकात् ७।१।२३ क्लीबादंगात्स्वमोर्लुक् स्या
त्। वारि इकोचि विभक्तौ ७।१।७३ इगंतस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ। वारिणी
वारीणि। न लुमतेति निषेधस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः। हे वारे हे वा
रि। आङोना वारिणा। घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् पूर्ववि
प्रतिषेधेन वारिणे वारिणः वारिणोः नुमचिरेति नुट्। नामीति दीर्घत्वं वारीणां
वारिणि वारिणोः हलादौ हरिवत् तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रद

५६ त्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्यात् टादावचि अनादये अना
दिने इत्यादि। शेषं वारिवत्। पीलुर्वृक्षः तस्य फलं पीलु तस्मै पीलुने अत्र न पुंवत्
प्रवृत्तिनिमित्तभेदात्। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७।१।७५ एषामनङ्
स्याट्टादावचि स चोदात्तः अल्लोपोऽन दध्ना दध्ने दध्नः दध्नोः दध्नि दधनि शेषं
वारिवत् एवमस्थिसक्थ्यक्षि तदन्तस्याप्यनङ्। अतिदध्ना सुधि सुधिनी।
हे सुधे हे सुधि सुधिया सुधिना मधु मधुनी मधूनि हे मधो। एवमंब्वादयः सानुश राम:
ब्दस्य स्नुर्वा स्नूनि सानूनि प्रियक्रोष्टु प्रियक्रोष्टुनी तृज्वद्भावात्पूर्वविप्रति ५६

षेधेन नुम् प्रियक्रोष्टूनि टादौ पुंवत्त्वपक्षे प्रियक्रोष्ट्रा प्रियक्रोष्टुना प्रियक्रोष्टुम
चिरेणेति नुट् प्रियक्रोष्टूनां सुलु सुलुनी सुलु सुलुनी सुलूनि सुल्वा सुलुना धातृ
धातृणी धातॄणि हे धातः हे धातृ धात्रा धातृणा एवं ज्ञातृकर्त्रादयः एच इग्घ्र
स्वादेशे आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युने
इत्यादि इह न पुंवत् यल्लिङ्गं तत्प्रद्यु इति नस्य भाषितपुंस्कत्वाभावात् एवमग्रेऽपि
प्ररि प्ररिणी। प्ररीणि प्ररिणा एकदेशविकृतस्यानन्यत्वात् रायो हलीत्यात्वं
प्रराभ्यां प्रराभिः नुमचिरेति नुट्यात्वे प्रराणामिति माधवः वस्तुतस्तु संनिपात

परिभाषयानुम्प्राप्त्वं न । नामीति दीर्घस्त्वारंभसामर्थ्यात्परिभाषां बाधानडुत्सुत्के पु
५८ राणं सुनु सुनुनी सुनूनि सुनुने इत्यादि इत्यजंता नपुंसकलिंगाः हो ढः ८।२।३१
हस्य ढः स्यात् झलि पदांते च हल्ङ्याब्भ्य इति सुलोपः पदांतत्वाद्धस्य ढः जश्त्वचर्त्वे
लिड् लिट् । लिहौ । लिहः । लिहं लिहौ लिहः लिड्भ्यामित्यादि लिट्त्सु दादे
र्धातोर्घः उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदांते च उपदेशे किं अधोक्षगित्य
त्र यथा स्यात् दामलिहमात्मानमिच्छति दामलिह्यति ततः क्विपि । दामलिट् । अ
त्र माभूत् एकाचो बशो भष् झषंतस्य स्ध्वोः ८।२।३७ धातोरवयवो य एकाच् झषंतं रामः ५९

तस्य बशः भष् स्यात् सकारे ध्वशब्दे परे पदांते च एकाचो
धातोरिति सामानाधिकरण्येनान्वये तु गर्दभमाचष्टे गर्दभयति ततः क्वि
पि णिलोपः गर्दप् झलि इति निवृत्तं स्ध्वोर्ग्रहणसामर्थ्यात् नैवेह न दुग्धं
दोग्धा अपदेशित्वाद् झषंतत्वेन धात्ववयवत्वाद् भष्भावः जश्त्वचर्त्वे धुक् धुग् दु
हः घत्वचर्त्वे धुक्षु वा द्रुहमुहष्णुहष्णिहां एषां हस्य वा घः स्यात् झलि पदांते च । ध्रुक्
ध्रुग् । ध्रुट् ध्रुड् द्रुहौ द्रुहः ध्रुड्भ्यां ध्रुक्षु ध्रुट्सु एवं मुहष्णुहष्णिहां इग्यणः सं ध्रुट्सु
प्रसारणं यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् वाह ऊठ् भ

स्यवाहः संप्रसारणम् ठस्यात् संप्रसारणाच्च संप्रसारणादचि
५५ पूर्वरूपमेकादेशः स्यात् एत्येधत्यूठ्सु विश्वौहः विश्वौहेत्यादिछंदस्येव
ण्विरितिपाठेणिजंताद्विच् चतुरनडुहोरामुदात्तः एनयोराम् स्यात्स
र्वनामस्थानेपरे सचोदात्तः सावनडुहः अनडु हशब्दस्यनुस्या
त्सौपरे आमित्यधिकारादवर्णात्परोयंनुम् अतो विशेष्यविहितेनना
पिनुमाम्नबाध्यते आमाच नुम्नबाध्यते सोर्लोपः नुम्विधिसामर्थ्याद्वसु ५५
स्रंसुध्वंसुनिदत्वंन संयोगांतलोपस्यासिद्धत्वान्नलोपोन अनड्वान् अमसंबु

द्धौ चतुरनडुहोरमस्यात्संबुद्धौ आमोपवादः हे अनड्वन् अनड्वाहौ अनड्वा
हः अनड्वाहं अनड्वाहौ अनडुहः अनडुहा वसुस्रंसुध्वस्वनडुहांदः सांतवस्वं
तस्यस्रंसादेश्चदःस्यात्पदांते अनडुद्भ्यामित्यादि सांतेतिकिं विद्वान् पदांतेति
किं स्रस्तं ध्वस्तं सहेःसाडःसः ८।३।५६ साड्रूपस्यसहेःसस्यमूर्द्धन्यादेशःस्यात् तु
राषाट् तुराषाड् । तुरासाहौ तुरासाहः तुराषाड्भ्यामित्यादि तुरंसहतेइतितुः छंदसि
सहइतिण्विः लोकेतुसाहयतेः क्विप् अन्येषामपीति पूर्वपदस्यदीर्घः दिवं औत्
दिवित्प्रातिपदिकस्यौतस्यात्सौपरे अल्विधित्वेनस्थानिवत्त्वाभावात् हल्

६० ऽव्यादिदिलोपेन सुद्यौः सुदिवौ सुदिवः सुदिवौ सुदिवं सुदिवौ सुदिवः दिवउत्
दिवावदिशउकारः स्यात्पदांते सुद्युभ्यामित्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः
षट्चतुर्भ्यश्च षट्संज्ञकेभ्यश्चतुरश्च परस्यामोनुडागमः स्यात् णत्वं द्वित्वं च
तुर्ण्णं चतुर्षु रोः सुपि ८।३।१६ सप्तमीबहुवचने परे रोरेव विसर्जनीयो नान्यरे
फस्य द्वित्वे प्राप्ते शरोचि अचि परे शरो न द्वेस्तः चतुर्षु प्रियचत्वा हे प्रियचत्वः
प्रियचत्वारो गौणत्वे नुडप्राप्तेर्ब्यते प्रियचतुरां प्राधान्ये स्यादेव परमचतुर्णां रामः
कमलं कमलौ वा आचक्षाणः कमल् कमलः षत्वं कमलषु मोनो धातोः ८।२। ६०

६४ धातोर्मस्य नः स्यात्पदांते नत्वस्यासिद्धत्वान्नलोपो न प्रशाम्यतीति प्रशान्
प्रशानौ प्रशानः प्रशान्भ्यामित्यादि किमः कः किमः कस्याद्विभक्तौ अकच्सहि
तस्याप्ययमादेशः कः कौ के इत्यादि सर्ववत् इदमो मः ७।२।१० इदमो मस्यात्सौ
परे त्यदाद्यत्वापवादः इदोय् पुंसि इदमिद्रूपस्यायं स्यात्सौ पुंसि सुलोपः अ
यं त्यदाद्यत्वं पररूपत्वं च। दश्च इदमो दस्य मः स्याद्विभक्तौ इमौ इमे त्यदादेः सं
बोधनं नास्तीत्युत्सर्गतः अनाप्यकः अककारस्य इदम इदो न स्याद् आपि विभक्तौ
परे आविति निर्देशादित्यारभ्य सुपः पकारेण प्रत्याहारः अनेन हलि लोपः ७।२।

सि·
६१

११३ अककारस्य इदम इदो लोपः स्याद्वि॰ हलादौ परतः नानर्थकेऽलोन्त्यविधि
रनभ्यासविकारे आद्यन्तवदेकस्मिन् १।१।२१ एकस्मिन् क्रियमाणं कार्यमादा
विवान्त इव स्यात् आभ्यां नेदमदसोरकोः।७।१।११ अककारयोरिदमदसो
र्भिस ऐस् न स्यात् एत्वं एभिः अत्वे नित्यत्वानुट् स्मै यश्चाद्धलि लोपः अस्मै
आभ्यां एभ्यः अस्मात् अस्य अनयोः एषां अस्मिन् अनयोः एषु। ककार
योगे तु। अयकं। इमकौ इमके इमकं। इमकौ। इमकान् इत्यादि इदमोऽन्वादेशे
ऽशनुदा